# FOREWORD

Advaita-dīpikā written by Svāmin Nṛsiṁhāśrama of the sixteenth century explains the position of the Advaitins in regard to *Brahman*, the *Advaita*, and *Jīva* and the universe. It came in the wake of an earlier work called Nyāyasudhā by Jayatīrtha which was written to assail the view of Monistic Vedānta. Though in the ultimate stage of non-dualism there is hardly any place for a question or an answer ( *advaite na praśno nā' py uttaram* ), yet on the empirical plane duality cannot be disowned and consequently the criticisms advanced against the position of the Advaitins are required to be met and set aside. It is known to scholars that criticism of *advaita*, non-dualism, comes mostly from those who have not studied at depth the fundamental principle underlying the approach of the monistic thinkers according to whom the very purport of the Upaniṣadic lore is non-dualism. Advaita is attested by the experience of enlightened souls and established on the basis of dialectics. The Advaitin states in unambiguous terms that he is prepared to accept any method by which the individual soul is sought to be explained. So says Sureśvara:

*Yayā yayā bhavet puṁsāṁ vyutpattiḥ pratyagātmani* |
*Sā sai'va prakriye'ha syāt sādhvī sā cā'navasthitā* ||

It is so believed by the advocates of dualism that in case they can find fault with the method employed by the Advaitins, they would succeed in attaining victory over them and compelling them to surrender. Vedāntadeśika, author of Śatadūṣaṇī, condemned the *Advaita* method in all his sixty-five *vādas*. It may not be out of place to mention in this context that my esteemed teacher in Mīmāṁsā and Vedānta, the late MM Ananta Krishna Śāstrin criticised and rejected each and every point of objection raised in Śatadūṣaṇī. At the outset he took up the subject of the agreement of Bādarāyaṇa-*sūtras* with non-dualism and next proceeded to examine the rejection of the methods. In truth, the methods are employed, as the Advaitins assert, to serve the purpose of reaching *advaita* and once the goal is reached they retain no value in and by themselves. Rightly does the grammarian philosopher state:

*Śāstreṣu prakriyābhedair avidyai'vopavarṇyate* ।

The Advaitins, therefore, do not attach any importance to the identities of the methods as possessing any ultimate value of their own. So says, Śrī Harṣa, author of Khaṇḍana-khaṇḍa-khādya:

*Abhīṣṭasiddhāv api khaṇḍanānām*
*akhaṇḍi rājñām iva nai'vam ājñā* ।
*Tat tāni kasmān na yathābhilāṣaṁ*
*saiddhāntike' py adhvani yojayadhvam* ॥

The argument employed for rejecting the views of the Naiyāyikas may be used in rejecting the methods of the

Siddhāntins also; but by doing so the Absolute *Brahman* remains as before as it is the *Sākṣin* and cannot be disowned.

The present work is intended primarily to refute the criticisms found in Nyāyasudhā, but, it helps us in understading the monistic position in all its pure and pristine glory. It may be mentioned that it is in the works of Nṛsiṁhāśrama, Madhusūdana and Brahmānanda that we find a clear and systematic unfoldment of the ambiguities that prove to be a stumbling block to a correct assessment of the monistic veiw.

## THE WORK

The author starts with a discussion about the true nature of *jīva*. The Śruti text, 'That thou art' ( *tat tvam asi* ) speaks about an identity between 'thou' ( *jīva* ) and 'that' ( *tat* ). What is implied by 'thou' ? In ordinary parlance, 'thou', i. e , *jīva*, the individual self, is understood differently as the physical body, the sense, the vital breath and the mind. But, we are told that the individual self is not any of them for which the expression is sheath or *kośa*. By a process of elimination we may apprehend the real nature of the Self that transcends all sheaths. The author draws upon a text of the Chāndogya Upaniṣad to show that *ātman* is different from *ahaṅkāra*, the mind. In chapter seven Sanat Kumāra initiating Nārada into the search for *ātman* mentions ( i ) the concept of *Bhūmā Brahman* ( ii ) the identity of 'I' ( *ahaṅkāra* ) and ( iii ) *ātman*. All these three are described as identical with 'all'. Now, this is possible only if the three are identical. But, according

to the Śruti text *tat tvam asi* in the last chapter the identity between *bhūman* and *ātman* is possible. But, *ahaṅkāra* cannot be described as all and hence the reference is only to show that it is different from both, as *ahaṅkāra* is accepted as different in each individual.

Jayatīrtha, on the other hand, contends that according to Pāñcarātra Āgama *aham* is not *ahaṅkāra* but *aniruddha*. This has been refuted in the light of the basic principle of six criteria used for finding out the purport of a whole chapter.

Next, comes the nature of *ānandamaya* in the Taittirīya Upaniṣad. Śaṅkarācārya discusses the topic in his commentary on the Sūtra, *ānandamayo'bhyāsāt* ( I. i. 12 ). Obviously *abhyāsa* or repetition is meant only for *ānanda* and not *ānandamaya*, the suffix *maya* referring to change or transformation ( *vikāra* ) as in the expressions, *anna-maya*, *prāṇa-maya*, etc., etc. In fact, however, there is repetition of the word *brahman* at the end of the paragraph, *asad brahme'ti veda ced, asti brahme'ti ced veda* etc. Needless to mention that *ānanda* is *Brahman*.

Further, the author rejects *anuvyavasāya* accepted by the Naiyāyikas and posits *sākṣin* in its place. In the wake of a piece of cognition, say for instance, 'this is a pot', there arises a mental cognition, viz., 'I know the pot'. This second cognition is called *anuvyavasāya* as it follows *vyavasāya* ( *anu* = after ). The Advaitin rejects this view by pointing out that the *sākṣin* or *ātman* who is witness of all mental activities cognises the first cognition. And, as such he

has the capacity to witness or enlighten all that comes into contact with him. The Advaitins, however, are quite conscious of the utility of *vyavasāya* or what they call *vṛttijñāna*. It is necessary, according to them to remove the *ajñāna* of a particular object. *Vṛttijñāna* is caused by sense-object contact. *Ātman* which is consciousness cannot repel *avidyā* as it reveals the latter. It is only *vṛttijñāna* which can dispel ignorance. The experience, 'This pot appears now' shows that the pot-condioned consciousness is now rid of *ajñāna*, which has been obscuring it before. It must be remembered that in this case no new knowledge is born as consciousness that reveals it is permanently there.

The author next takes up the question why *vṛtti* is to be accepted and why it flows through sense and pervades the object. *Vṛtti* is an offshoot of the mind which removes *ajñāna* veiling our object-conditioned consciousness. When that is removed the consciousness that becomes identified with the mind-conditioned consciousness reveals the object with the result that we cognise the object. The above is accepted only in the case of perception of external objects and not for the perception of the mind and any of its qualities.

In respect of cognition arising from *anumāna*, *śabda* etc., *vṛtti* arises within the mind and repels such *ajñāna* as obscures the object concerned. *Ajñāna*, as we are told, has two aspects, viz., one that obscures existence and another that obscures the perceptual appearance. Both these aspects are removed by perception only, but, other

*pramāṇas* can remove the existence-obscuring capacity only. It is, therefore, that when we infer the fire on the hill we say that the fire exists on the hill. But, we obtain a perceptual knowledge of the fire and we say: ( i ) I see the fire and ( ii ) The fire exists.

Further, the author discusses the meaning of *jñāna*. Is it *vṛtti*, the modification of the mind or is it *Brahman*? The Śruti text runs as follows : *satyaṁ jñānam anantaṁ brahma.* Surely *vṛtti* is not *jñāna*. If it were *jñāna* it would have been self-luminous which is not endorsed by the Advaitins. *Brahman* alone is self-luminious. *Vṛtti* is not *Brahman* as well, since if it were so, such experiences as knowledge is born, or knowledge perishes could hardly be explained. The answer to the problem is stated as follows: *Brahman* consciousness as conditioned by *vṛtti* is *jñāna*. *Jñāna* is neither pure *Brahman* nor pure *vṛtii*. *Vṛtti* is inert and it cannot be *jñāna*. Pure *Brahman* is only indicated through implication in such Śruti texts as '*Satyaṁ jñānaṁ brahma*'. It may also be said that the primary meaning of *jñāna* is consciousness reflected in the *vṛtti*.

The author next proceeds to prove that *jñāna* is one and that it is not a quality of *ātman* as the Naiyāyikas say. *Ātman* in monistic Vedānta is not anything other than *Brahman*.

Among other topics discussed in the work are the following:

1. Bliss is not an attribute of *Brahman* but its very essence. Pain is a quality of the mind. It is experienced by us due to the fact that we fail to discriminate the mind, the locus of pain, from the self. In the state of emancipation both pain and its locus take to their heels with the dawning of *Brahman*-knowledge.

2. Size of *Ātman* is the next topic. *Ātman* is ubiquitous. This is explained in the *sūtras Utkrāntigatyāgatīnām, Svātmanā co'ttarayoḥ, Nā'ṇur atacchruter iti cen ne'tarādhikārāt, Svaśabdonmānābhyāñ ca, Avirodhaś candanavat, Avasthitivaiśeṣyād iti cen nābhyupagamād dhṛdi hi, Guṇād vā lokavat, Vyatireko gandhavat, Tathā ca darśayati, Pṛthag up adeśāt, Tadguṇasāratvāt tu tadvyapadeśaḥ prājñavat.*

3. Agency (*kartṛtva*) is not a quality of *Ātman.* The Bṛhadāraṇyaka says: *dhyāyatī'va lelāyatī'va,* where *iva* is intended to imply that *Ātman* acts as if he were the agent. And, this is so because of *adhyāsa.*

4. The falsity of duality is accepted also on the authority of the Upaniṣadic texts: *yatra hi dvaitam iva paśyati.*

5. What is meant by *avidyānivṛtti*? Is it the destruction of *avidyā*? Vimuktātman and his followers Ānandānubhava, Ānandabodha and others say that it is neither *sat,* nor *asat,* nor *sadasat,* nor even *sadasadvilakṣaṇa.* It is a fifth kind. Madhusūdana Sarasvatī follows Sureśvara when he says: There is nothing as *dhvaṁsa*

# उपोद्घातः

श्रीनृसिंहाश्रमस्वामिभिः रचिताया अद्वैतदीपिकायाः प्रथमपरिच्छेदात्मकः प्रथमभाग इदानीं मुद्राप्य पण्डितानां पुरतः उपस्थाप्यते। सप्ततिवत्सरेभ्यः पूर्वमियमत्रैव काश्यां मुद्रापिता बहुग्रन्थपातयुता दुर्लभा च समजनि इतीदानीमत्यन्तशुद्धमातृकालाभेन तत्सहायेन सम्यक्संशोध्य श्रीसम्पूर्णानन्दसंस्कृतविश्वविद्यालयमुखेन पुनर्मुद्राप्य प्रकाश्यते।

श्रीनृसिंहाश्रमपूज्यपादा बहूनामद्वैतग्रन्थानां रचयितृत्वेन सुप्रसिद्धाः न्यायशास्त्रे पाण्डित्यप्रकर्षयोगात् न्यायरीत्या खण्डनपरान् जयतीर्थादिग्रन्थान् निरसितुं न्यायशास्त्रशैल्या अद्वैतपदार्थात् निष्कृष्य प्रदर्शयितुं चाद्वैतदीपिकाख्यं उत्तमं निबन्धं निबबन्धुः।

एतेषां विद्यागुरवः जगन्नाथाश्रमाः काश्यां स्थित्वा बहूनां सन्यासिनां गृहस्थानां च ब्रह्मविद्याप्रदानेन सुप्रसिद्धाः। श्रीआनन्दगिरिपादानां पञ्चीकरणव्याख्यायाः टीकाकृतः श्रीरामतीर्था आहुः स्वग्रन्थेः—

जगन्नाथाश्रमाद्या ये गुरवो मे कृपालवः।
तानहं विधिवन्नत्वा करवै तत्त्वचन्द्रिकाम्॥ इति

एतेषां मन्त्रगुरवः श्रीगीर्वाणेन्द्रसरस्वत्याख्याः मन्त्रशास्त्रनिष्णाताः प्रपञ्चसारसंग्रहाख्यं प्रकरणं भगवत्पादीयप्रपञ्चसारग्रन्थोक्तमन्त्राणां प्रयोगपुरश्चरणफलादिनिर्णयप्रतिपादकं लोकहितार्थं रचयांबभूवुः। तानधिकृत्य प्रकृतग्रन्थस्थः श्लोकः—

कल्याणगुणसम्पूर्णं निर्वाणविभवालयम्।
गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणं भजे॥ इति।

एते ग्रन्थकाराणां मन्त्रदीक्षागुरव इति अद्वैतदीपिकाव्याख्यातारः नारायणाश्रमाभिख्याः ग्रन्थकृच्छिष्याः एतच्छ्लोकमवतारयन्ति।

नीलकण्ठविजयादिकाव्यनिर्माता श्रीनीलकण्ठदीक्षितः एनान् स्वगुरुत्वेन निर्दिश्य प्रणमति स्वीये शिवलीलार्णवे।

अर्धांशेन देव्यात्मकं शिवं न स्तौमि अपितु गीर्वाणेन्द्रसरस्वतीन् ये सर्वात्मना शैलसुतात्मकाः विजयन्ते देव्या उपासनेन—इति वदन्तः।

कल्पतरुपरिमलाख्ये वेदान्तनिबन्धे श्रीअप्पय्यदीक्षितैः—"गुरुभिरुपदिष्टमर्थं विस्मृतमपि तत्र बोधितं प्राज्ञैः। अवलम्ब्य शिवमधीयन् व्याकरोमि कल्पतरुम्॥ इति पद्ये प्राज्ञैः इतिपदेन उल्लिखिताः प्राज्ञाः इम एवेति साम्प्रदायिका आहुः।

एते च काश्यां १५७९ शाके मिलितया तत्कालप्रसिद्धमहाविदुषां सभया

एकस्मिन् धार्मिकविषये विवादमधिकृत्य विसृष्टे व्यवस्थापत्रे श्रीनृसिंहाश्रम, गागाभट्ट, अप्पय्यदीक्षित खण्डदेव अनन्तभट्टादीनां पण्डितप्रकाण्डानां हस्ताक्षराणि सन्ति। एतेनापि ज्ञायते यत् श्रीनृसिंहाश्रमश्रीचरणाः श्रीमदप्पय्यदीक्षितखण्डदेवादिसमकालिका इति। सम्मतिपत्रं च श्रीसूर्यनारायणशुक्लमहोदयैः स्वेन संम्पादितभाट्टचिन्तामणिग्रन्थभूमिकायां सामस्त्येन मुद्रित प्रकाशते।

अस्मिन्नेव सन्दर्भे श्रीनृसिंहाश्रमैः श्रीदीक्षितमहाभागाः प्रेरिताः कल्पतरुव्याख्यां कर्तुमिति संभाव्यते।

एते चश्रीनृसिंहमन्त्रपुरश्चरणेन न केवलं श्रीनृसिंहभक्ता अपि च वेङ्कटाचलनायके कृताविर्भावे श्री वेङ्कटेश्वरे महतीं भक्तिं ग्रन्थेऽस्मिन् तत्र तत्र प्रकटयन्ति।

यथा प्रथमपरिच्छेदे ५४ पुटे—

जिज्ञासितश्रीवेङ्कटाचलनायककमनीयलीलाविग्रहबुद्धिधारासामग्र्यां सत्यामपि—इत्यादिना। एतेषां संपूर्णयोगपट्टः 'ब्रह्मेन्द्रसरस्वत्याख्ययतिनृसिंहाश्रमः' इति प्रकृतसम्मतिपत्रे उल्लेखात् नृसिंहाश्रमब्रह्मेन्द्रसरस्वती इति निर्णीतं भवति।

## एतैः विरचिता ग्रन्थाः

(१) भेदधिक्कारः—काश्यां श्रीनारायणाश्रमकृतटीकया सह प्रकाशितः।
(२) तत्त्वविवेकः—स्वकृतटीकया सह मैसूरविश्वविद्यालये प्रकाशितः।
(३) संक्षेपशारीरकव्याख्या—काश्यां संस्कृतविश्वविद्यालये प्रकाशिता।
(४) पञ्चपादिकाविवरणटीका भावप्रकाशिका—मद्रास प्राच्यलिखितपुस्तकभाण्डागारेण मुद्रापिता।
(५) अद्वैतदीपिका—पूर्वं पण्डितपत्रिकायां प्रकाशिता द्वितीयपरिच्छेदान्तम्। इदानीं समग्रं मुद्रापयिष्यते।
(६) नृसिंहविज्ञापनम् प्रार्थनारूपत्वेपि वेदान्तार्थप्रकाशनपरो ग्रन्थः।

## मातृका

पूर्वं मुद्रितपुस्तकस्याशुद्धिग्रन्थपातादियुक्तत्वेपि काश्यां हनुमद्घट्टस्थभजनमन्दिराध्यक्षेण श्रीरामकृष्णशास्त्रिवर्येण स्वपूर्वकैः संगृहीतं अत्यन्तविशुद्धं हस्तलिखितं सव्याख्याद्वैतदीपिकापुस्तकं प्रमोदेन मद्धस्ते समर्पितम्। तच्च प्राचीनैः शोधितमेवासीदतः मुद्रणे पुस्तकान्तरावलोकनप्रयासं विनैव तेनैव पुस्तकेन सर्वं मुद्रणकार्यं निर्व्यूढमासीत्। श्रीरामकृष्णशास्त्रिमहोदयेभ्यः कृतज्ञतां समर्पयामि।

विदुषां वशंवदः
**एस्० सुब्रह्मण्यशास्त्री**

# विषयानुक्रमणी


| विषयाः | पृष्ठाङ्काः |
|---|---|
| मङ्गमाचरणम् | १, २ |
| गुरुस्तुतिः | ३ |
| सन्यासिनः त्वंपदार्थविवेकस्य स्वकर्मसु प्राधान्यात् तस्यैवात्र कर्तव्यत्वेन प्रतिज्ञा | ६, ७ |
| त्वंपदार्थस्य अहमनुभवगोचरात् पृथक्कृत्य प्रदर्शनप्रतिज्ञा | ८ |
| छान्दोग्यसप्तमे 'सएवाधस्तात्' इत्यादिना भूम्नः 'अथातोऽहंकारादेश' इत्यादिनाऽहंकारस्य अथात आत्मादेश इत्यादिना आत्मादेशस्योक्तेः आत्मादेशात् पृथक् अहंकारादेशः तस्यात्मनः पृथक्त्वसिद्धयर्थः आत्मादेशात् पृथक् भूम्नः आदेशः आत्मभूम्नोः ऐक्यार्थ इति विवेचनम् | ९ |
| अत्र नवीनाक्षेपः अहंकारपदं अनिरुद्धपरं इति | १० |
| नवीनमतखण्डनम् | १३ |
| भूमपदार्थनिष्कर्षः | १६ |
| भूमानिरुद्धयोरैक्यनिराकरणम् | १७ |
| अनिरुद्धएवाहंकार इति स्मृतितात्पर्यम् | १८ |
| अत्र जीवोपदेशस्यावश्यकता | २० |
| अहंकारस्य सर्वगतत्वोपपादनम् | २१ |
| सर्वात्मत्वश्रुतेः सर्वगतत्वपरत्वनिरासः | २२ |
| ब्रह्माहंकारयोः पृथगुपदेशः अभेदार्थ इति पक्षनिरासः | २३ |
| आनन्दमयो जीव एव न ब्रह्म | २४ |
| आनन्दमयब्रह्मत्वनिरासः | २७ |
| अन्नमयादीनामब्रह्मत्वनिरूपणम् | ३१ |
| योऽयं विज्ञानमयः प्राणेषु इति श्रुतेः अहंकारो नात्मा जीवः अभोक्ता | ३३ |
| पाञ्चरात्रे जीवब्रह्मैक्यबोधनम् | ३५ |
| अहंकारो नात्मा दृश्यत्वादित्यनुमाने पूर्वपक्षिण आक्षेपः | ३६ |
| सुषुप्तावहंकारसद्भावकथनम् | ३९ |
| अहमर्थस्यानात्मत्वसिद्धान्तः विशेषविवरणम् | ४१ |

| विषयाः | पृष्ठाङ्काः |
|---|---|
| आनन्दस्यैवाभ्यासो नानन्दमयस्य- 'यदेष आकाश आनन्दो न स्यात्" इत्यादौ आनन्दाभ्यासस्यैव दर्शनात् इति समाधिः। जीवस्यापि ब्रह्माधीन-सत्ताकतया मयडुपपत्तिश्च | २५ |
| जयतीर्थोक्तस्य आनन्दमयो ब्रह्म मयटः प्राचुर्यार्थत्वात् इति पूर्वपक्षस्य अभ्यासस्य पुच्छब्रह्मविषयत्वादितिसमाधानम् | २७ |
| ब्रह्मणोऽपि पुच्छवत्त्वं अविरुद्धम् एकस्यैव ईश्वरशक्त्या उभयरूपत्व-संभवादिति जयतीर्थः अवयवत्वनिर्वचनेन ब्रह्मणो निरवयवस्य तदनुपपत्ति-प्रदर्शनेन जयतीर्थखण्डनम् | २९ |
| अन्नमयादीनामपि ब्रह्मत्वशङ्का अन्नमयादीनामब्रह्मत्वेन समाधानम् अन्नमयस्य ब्रह्मत्वे अन्योऽन्तर आत्मा प्राणमय इत्युक्तान्तरत्वानुपपत्तिप्रदर्शनम् | ३० |
| अहङ्कारानात्मत्वे योऽयंविज्ञानमयः प्राणेषु इत्यादि बृहदारण्यकश्रुतिं प्रमाणयति 'प्राज्ञेनात्मना संपरिष्वक्तः' इति श्रुतेः सुषुप्त्युत्क्रान्त्योर्भेदेनेति सूत्रस्य च अहम्प्रत्ययविषयादन्यजीवबोधकत्वेन प्रामाण्यम् | ३३ |
| तयोरन्यः पिप्पलं स्वाद्वत्तीत्यस्यान्तः करणपरत्वव्यवस्थापनम् | ३४ |
| जीवक्षेत्रज्ञयोरभेदः जीवपरयोश्चाभेदश्च पाञ्चरात्रे स्पष्ट इत्युपपादनम्। | ३५ |
| अहंकारस्यानात्मत्वे सिद्धान्त्यनुमानम्-अहंकारो नात्मा दृश्यत्वात् तस्मिन् प्रतीयमानेप्यप्रतीयमानत्वाद्वा घटवत् | ३६ |
| अनुमाने पक्षदूषणम्—साध्यदूषणं च | ३७ |
| हेतुदूषणम् | ३८ |
| सिद्धान्तः-दृश्यत्वहेतूपपादनम् | ४० |
| मम शरीरमिति प्रत्यक्षं देहाभेदप्रत्यक्षबाधकं न, अहंप्रत्ययविषयो नात्मा विना-शित्वात् मितत्वाच्च | ४४ |
| अहं सुखमस्वाप्समिति परामर्शस्य अविद्यावच्छिन्नो विषय इति पक्षः | ५० |
| अहंकारातिरिक्तात्मस्थापनम् | ५२ |
| तत्र प्रमाणतया आप्रहरं भगवतोध्यानवतां यत् पश्चात् तावत्कालीनानात्मगोचर-चित्रवृत्तिगोचरं चानुसन्धानं अहङ्कारात्मवादेऽनुपपन्नं तत्कालीनात्मविषयक-संस्काराभावात् अतः अहंकारातिरिक्तसाक्षिवेद्यत्वम् | ५३ |
| अनुव्यवसायनिराकरणम् | ५५ |
| अदृष्टस्य न साक्षात्ज्ञानहेतुता | ५८ |
| अनुव्यवसायाङ्गीकारे हरेः द्वादशनामानि नैरन्तर्येण शृण्वतः संख्यानुवन्धाना-नुपपत्तिः | ५६ |

**विषयाः** **पृष्ठाङ्काः**


इष्टविषयकज्ञानानन्तरमेव सुखं जायते न तु तदनुव्यवसायात् अतोऽपि नानुव्यवसायः ६०

अहंकारसमवेतं ज्ञानं स्वप्रकाशमिति प्रभाकरमतनिरासः ६२

स्वविषयत्वं स्वप्रकाशत्वमिति नवीनपक्षः स्वस्य स्ववेद्यत्वे विरोधाभावश्च ६२

चैत्रसमवेतघटज्ञानं चैत्रापरोक्षानुभवविषयः तदीयापरोक्षव्यवहारविषयत्वात् इति नव्यमतम् ६४

स्वविषयत्वरूपस्वप्रकाशत्वनिरासः तत्र एतज्जनकसन्निकर्षानाश्रयत्वमिति हेतुः स्वविषयत्वाभावे स्वस्य प्रकाश एव न भवतीति प्रश्नसमाधिः ६५

स्वविषयत्वानिर्वचनानुपपत्तिः अभेदस्य संबन्धत्वनिरासः ६९

तदात्मानमेवावेदित्यस्योपपत्तिप्रदर्शनम् ७१

विषयज्ञानाश्रयत्वेनाहमर्थप्रकाशनिराकरणम् ७२

अपरोक्षव्यवहारविषयस्याहमर्थस्य संविदभिन्नत्वेनैवापरोक्षत्वं वाच्यं अभेदश्च काल्पनिकः संबन्धः ७५

गुरुमते एतावत्कालमद्राक्षं नेतः परमद्राक्षं इत्यनुभवानुसन्धानं साक्षिणैव वृत्तिज्ञानं मास्तु साक्षिणैवोपपत्तेरिति पूर्वपक्षः ७६

वृत्तेरावश्यकत्वप्रसाधनम् ७६

व्यासंगे यद्विरहादज्ञाननिवृत्तिविरहः सा वृत्तिरेष्टव्या ८१

वृत्तेरज्ञाननिवृत्तावुपयोगः ८२

अज्ञानस्य चैतन्याविरोधित्वं अप्रकाशत्वं च वृत्तिसहकृतचैतन्यादज्ञाननिवृत्तिः ८४

देवदत्तो जानाति घटः स्फुरति इति वृत्तिस्फुरणयोः भेदेनानुभवात् तयोर्भिन्नता ८६

विषयावच्छिन्नं अभिव्यक्तं चैतन्यं स्फुरणपदार्थः अनुमेयस्य फलव्याप्यत्व-निरासश्च ८९

स्फुरणमेव ज्ञाततेति मतनिरासः ९१

ज्ञानविषययोः कस्संबन्ध इति विचारः स्वमते अन्तःकरणवृत्तेः विषयेण संयोगादिः संबन्धः ९२-९३

वृत्तिनिर्गमनप्रयोजन विचारः तत्रानुमानप्रयोगः ९५

वृत्तिनिर्गमनावश्यकत्वे वाचस्पतिमतम् ९७

वृत्तिस्वरूपविचारः-स्वसिद्धान्तश्च ९८

वृत्तेर्द्रव्यत्वे चोद्यपरिहारौ ९९

साक्षिज्ञानं अनुभवः अनादिश्च १००

स्फुरणस्य नित्यत्वेपि अहङ्कारानुसन्धानोपपत्तये संस्कारावश्यकता १०६

| विषयाः | पृष्ठाङ्काः |
|---|---|
| अहमाकारा वृत्तिर्न ज्ञानम् अहमर्थप्रकाशोपपत्तिश्च | १०८ |
| नित्यानुभवस्यावश्याङ्गीकर्तव्यता | १११ |
| बुभुत्सानज्ञानहेतुः | ११२ |
| ज्ञानाभावस्य केन ग्राह्यता–इति प्रश्नः | ११४ |
| ज्ञानाभावसाक्षी अहमर्थधर्मातिरिक्तः साक्षी एषितव्यः घटज्ञानमुत्पन्नं विनष्ट- | ११८ |
| मित्यनुभवविषयविवेचनम् | ११६ |
| ज्ञानशब्दार्थद्वैविध्येन स्वमतोपपादनम् | १२१ |
| वृत्तिशबलचैतन्यं ज्ञानपदार्थः | १२२ |
| अनुभव एक एवेति स्वमतम् | १२३ |
| अनुभवत्वजातिनिराकरणम् | १२५ |
| अनुगतेच्छानिरासः | २२८ |
| अनुभवस्वरूपनिष्कर्ष अनुभवो गुणः तदाश्रयश्चाहंकारः | १३० |
| संविदः एकत्वनित्यत्वोपपत्तिः | १३२ |
| अनुव्यवसायस्थानापन्नः साक्षी | १३४ |
| विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वनिरासः प्रागभावनिरासश्च | |
| उत्तेजकत्वनिराकरणम् | १३८ |
| मण्याद्यभावस्याकारणत्वम् | |
| प्रागभावनिरासः | १४२ |
| धारावाहिकज्ञानभेदे संयोगभेदस्यैव कारणत्वम् | १४७ |
| गुणाश्रयत्वं न द्रव्यलक्षणम् इति निरूपणम् | १४८ |
| स्वप्नज्ञानसाक्षित्वेन नित्यानुभवसाधनम् | १४६ |
| स्वप्नज्ञानं नान्यथाख्यातिः नापि स्मरणम् | १५० |
| आत्मरूपं ज्ञानं सविषयं निर्विषयं वा उभयथाप्यभावात् आत्मा न | |
| ज्ञानमिति शङ्का | १०४ |
| मुक्तौ ज्ञानाभावनिरासः | १५६ |
| अधिष्ठानसत्तातिरिक्तसत्ता नारोपिते-इति सिद्धान्तः | १५८ |
| प्रमाऽप्रमाबहिर्भूतज्ञानसाधनम् | १६० |
| भ्रमलक्षणस्य न्यायमते सिद्धस्यानुपपत्तिः | १६२ |
| संविदात्मनोरभेदेऽनुमानप्रयोगः | १६४ |
| आत्मना सर्वात्मनः सत्त्वमेव | २६६ |
| असत उत्पत्तिनिरासः | १६७ |

| विषयाः | पृष्ठाङ्काः |
|---|---|
| सत्कार्यवादपरीक्षा | १७० |
| ज्ञानात्मनोः संबन्धानिरूपणान् न गुणगुणिभावस्संबन्धः | |
| आत्मस्वरूपस्य ज्ञानस्य ज्ञानत्वं न स्यात् इति शंकानिरासः | १७७ |
| एवमेवास्मादात्मनः इत्यादि श्रुतेः जीवोत्पत्तिशङ्का, निरासः नहिद्रष्टु-दृष्टेरिति श्रुतेः | १७८ |
| दृशिरूपस्य द्रष्टृत्वोपपादनम् | १७९ |
| अहमनुभवे प्रकाशमानस्यात्मनः स्वरूपविचारः | १८० |
| अहमिहैवास्मि जानान इत्यनुभवादात्मनः परिच्छिन्नत्वशंका देहाभेदादारोप इति समाधानम् | १८४ |
| आत्मा ज्ञानस्वरूपः अन्तः करणतादात्म्याध्यासात् तस्यम्कर्तृत्वदुःखादि । सुखानुभवस्तु आत्मस्वरूपसुखस्यैव | १८५ |
| उपपत्ति सहितः समकालिकविषयदुःखिप्रेमास्पदत्वानुभवः आत्मनः उभयरूपत्वं ख्यापयतीति व्यवस्था | १८६ |
| विभुगुणानां स्वसमवाय्यवच्छिन्नदेशमात्रोत्पत्तिरिति नियमखण्डनम् | |
| सुखाद्याश्रयस्य विभुत्वानुमाननिरासः | १९० |
| उत्क्रमणश्रुतेरौपचारिकत्वखण्डनम् | १९२ |
| आत्मनः अणुत्वशङ्का | १९४ |
| आत्मनोऽनणुत्वे अणुत्वश्रुतिविरोधपरिहारः परमात्मन एव वेदितव्यत्वात् | १९७ |
| जीवाणुत्वमतनिरासः | २०० |
| ध्यायतीवेत्यत्र इवशब्दस्य मिथ्यात्वमेवार्थः न तु स्वातन्त्र्यनिषेधमात्रम् | २०४ |
| मुक्त्यवस्था स्वाभाविकी न तु कृतिसाध्या | २०७ |
| स्वेन रूपेणाभिष्पद्यते इति श्रुत्यर्थः जक्षत्क्रीडन्-इत्यादिः स्मृतिः | २०८ |
| ज्ञानाय श्रवणादिविधिसार्थक्यम् | २१० |
| अविद्यानिवृत्तिस्वरूपवर्णनम् | २११ |
| अभावस्याधिकरणस्वरूपता | २१४ |
| अविद्यानिवृत्तेः ज्ञानसाध्यत्वोपपादनं | २१७ |
| आत्मनः निरतिशयानन्दत्वसाधनम् | २१८ |
| आत्मनः सुखरूपत्वे परमप्रेमास्पदत्वं हेतुः तत्राप्रयोजकत्वशंका | २२० |
| दुःखाभावस्यापुरुषार्थता | २२८ |
| सांख्यमतनिरासः | २३० |
| आत्मनः सुखरूपत्वे पूर्वपक्षः | २३१ |

| विषयाः | पृष्ठाङ्काः |
|---|---|
| सुखं ज्ञानस्वरूपमेव | २३३ |
| दुःखध्वंसो मोक्ष इति न्यायमतनिरासः | २३६ |
| सुखात्मनोः भेदनिरासः | २३९ |
| सुखात्मनोरैक्ये सुखविशेषोपलब्धिः कथमिति शंकानिरासः | २४० |
| सुषुप्तौ दुःखसद्भावे अनुमानाभावात् पाश्चात्यस्मरणाभावाच्च दुःखाभावसिद्धिः | २४१ |
| आत्मनः स्वप्नसाक्षित्वनिरूपणम् बृहदारण्यकषष्ठे आत्मनः स्वयं ज्योतिष्ट्वसाधनं | २५१ |
| परमात्मन इति नवीनमतम् | २६२ |
| जीवस्य स्वप्रकाशत्वे तात्पर्यनिर्णयः | २६३ |
| आत्मशब्दस्य जीव एव मुख्यार्थः इति सिद्धान्तः | २५३ |
| ईश्वरस्य जीवादभेदादेव क्वचिदात्मपदप्रयोगः ईश्वरे आत्मैवेदमित्यादौ | २५७ |
| योगव्युत्पत्त्या आत्मनो व्यापकत्वम् | २५८ |
| आत्मनः स्वप्रकाशत्वेऽनुमानम् | २५८ |
| आत्मनः स्वप्रकाशत्वे नवीनविकल्पाः | २५९ |
| स्वप्रकाशत्वं संविदविष्यत्वम् सि० | २६३ |
| अवेद्यत्वेसति अपरोक्षव्यवहारविषयत्वात्यन्ताभावानधिकरणत्वं तदितिविवरणम् | २६४ |
| अस्वप्रकाशत्वखण्डमम् | २६५ |
| ब्रह्मणोऽवेद्यत्वम् | २६६ |
| व्यावहारिकापरोक्षत्वनिर्वचनम् | २६७ |
| स्वप्रकाशत्वानुमाने केवलान्वयिधर्मे व्यभिचारवारणम | २६८ |
| प्रमेयत्वादीनां केवलान्वयित्वनिरासः | २७० |
| प्रमात्वमेव प्रमेयत्वमिति पक्षनिरासः | २७० |
| अनुभूतित्वजातिनिरासः | २७१ |
| ज्ञानं वेद्यं वस्तुत्वाहित्यनुमाननिरासः | २७२ |
| अकर्तृत्वे सति द्रष्टृत्वं साक्षित्वमिति साक्षित्वस्य निर्वचनम् | २७४ |

ग्रन्थसमाप्तिः

परमेश्वरप्रसादाधीनमेव ज्ञानैश्वर्यादिशक्तिमत्त्वमवगम्यते। ततश्च स एव स्वेच्छोपात्तश्रीनृसिंहाकारलीलाविग्रहोपलक्षितो मुमुक्षुभिरुपासनीयः। यस्मात् "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च"[1] इति श्रुतेरिति द्योतयन् तमेव निरतिशयज्ञानैश्वर्यसम्पन्नपरिपूर्णसत्यज्ञानानन्दस्वरूपं परमात्मानं पुनरपि प्रार्थयते—यस्येति।

यद्वा यथा "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविज्येते"[2] इति सर्वकामोद्देशेन चोदितयोर्दर्शपूर्णमासयोरावर्तितयोस्तत्तत्फलहेतुत्वम् एवं परमात्मस्मरणमपि "स्मृते सकलकल्याणभाजनं यत्र जायते"[3] इत्यादिवचनात् सकलकल्याणहेतुभूतमावर्तितं सद्वाग्देव्यादिप्रसादलभ्यमपि कल्याणं साधयिष्यतीत्यभिप्रायेण तमेव [4]भूमानं चेतसि सन्निधापयति—यस्येति।

यस्य भूम्नः आज्ञातिलङ्घनेऽतिभीता ब्रह्मादयो लोकनाथाः प्रत्यहं स्वस्वकार्येषु वर्तन्त इत्यर्थः। तदुक्तं श्रीभगवता—

लोकानां लोकपालानां मद्भयं कल्पजीविनाम्।
ब्रह्मणोऽपि भयं मत्तो द्विपरार्धपरायुषः॥ इति।

ननु ब्रह्माद्यानन्दतारतम्यस्य विषयतरतमभावाधीनतया विषयजन्यत्वं वक्तव्यम्। तथा च नित्यपरमानन्दाभावेनात्मनस्तद्रूपत्वायोगात् तत्प्राप्तिरपुरुषार्थ इत्याशङ्क्य "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते"[5] इत्यानन्दस्यैव जगत्कारणत्वेन निर्धारितत्वात् तस्योत्पत्त्ययोगाद् ब्रह्माद्यात्मस्वरूपानन्दस्यैव तादृशविषयजन्यान्तःकरणवृत्तितारतम्याधीनाभिव्यक्तितारतम्यमात्रम्, "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति"[6] इति श्रुतेरित्यभिप्रायेणाह—यस्यानन्दशतांशभागिन इति। यस्य परमात्मनः स्वरूपभूतपरमानन्दशतांशाभिव्यक्तिमन्त इन्द्रादयो निर्वृताः कृतार्था वयमित्यभिमन्यन्त इत्यर्थः। षष्ठी च राहोः शिर इतिवद् द्रष्टव्या। आनन्दरूपस्यापि प्रपञ्चवदसत्यत्वे जडत्वे वाऽपुरुषार्थत्वमिति तस्य सत्यज्ञानादिवाक्यसिद्धसदादिरूपत्वमाह—तं

१. नृसिंहोत्तर० २-४।
२. जै० न्या० ४-३-१०।
३. वि० मु० १७-१७।
४. भूमा ब्रह्म, भूमासंप्रसादादिति न्यायात्।
५. तै० उ० ३ प्र० ६। ख० ६। क०।
६. बृ० उ० ४-३-३२।

सत्यपि सुखानुत्पत्तौ तस्य तदहेतुत्वप्रसङ्गात् । न च सुखानन्तरं विनश्यदवस्थेष्टविषयज्ञानात्तदनुव्यवसाय इति वाच्यम् । सुखस्यावश्यवेद्यत्वनियमेन तज्ज्ञानात्पूर्वं तस्य नष्टत्वात् । न च ज्ञानसुखयोः समूहालम्बनम् । तयोःसहोपस्थितिनियमे पौर्वापर्यस्य दुर्ग्रहतया कार्यकारणत्वस्य दुर्ग्रहत्वात् । परिशेषस्य दुरवधारणतयेष्टदर्शनार्थिप्रवृत्त्यनुपपत्तेः ।

न च सुखमिष्टज्ञानजन्यम् तद्विषयकृतिजन्यत्वात् संमतवदित्यपि । एवमपि कृत्यनन्तरभावीष्टज्ञानस्य कारणत्वासिद्धेः । व्यभिचारादप्रयोजकत्वाच्च । कृतिपूर्वज्ञानस्यापि कृतिकार्ये न हेतुत्वमिति वक्ष्यते । एतेन सुखानुमितेष्टज्ञानमनुसन्धीयत इति निरस्तम् ॥

---

इष्टज्ञानस्य निर्विकल्पद्वारेणानुव्यवसायोत्पत्तिसमये नष्टस्यानन्तरं न सुखजनकत्वमित्याह । न, अनुव्यवसायेति । किञ्चेष्टज्ञानस्य सुखं प्रति चरमकारणत्वात्तदनन्तरक्षण एव तदनुत्पत्तौ तत्कारणत्वमेव न स्यादित्याह—इष्टज्ञान इति । इष्टज्ञानं द्वितीयक्षणे सुखमुत्पाद्य तृतीयक्षणे ऽनुव्यवसायविषयो भविष्यतीत्याशङ्क्य तदा सुखज्ञानस्यावश्यम्भावित्वान्नानुव्यवसायावकाश इत्याह—न च सुखेति । नन्विष्टज्ञानमपि विषयीकृत्योत्पद्यमानं सुखज्ञानं समूहालम्बनरूपं भविष्यतीत्याशङ्क्य तथासति सव्येतरविषाणवत्सहोपस्थितत्वात् कार्यकारणभावग्रहायोग इत्याह—न च ज्ञानेति । ननु सुखं सकारणकं कार्यत्वादिति सामान्यतस्तत्सिद्धौ परिशेषादिष्टज्ञानमिति सिध्यतीत्याशङ्क्याह—परिशेषस्येति । इष्टज्ञानस्य तव मते ऽनुपस्थितत्वाद्वस्तुतस्तद्धेतोरेव कारणत्वसम्भवान्न परिशेष इत्यर्थः । तर्हि सुखत एवेष्टज्ञानस्य कारणत्वमनुमीयत इत्याशङ्क्याह—न च सुखमिति । सम्मतवदिति । तन्तुविषयकृतिजन्यस्य पटस्य तन्तुज्ञानजन्यत्ववदित्यर्थः । कृतिजनकज्ञानस्य कृतिकार्ये कारणत्वं कुत्रापि नास्ति, अङ्गीकृत्याप्याह—एवमपीति । कृत्यनन्तरभावितन्त्वादिविषयज्ञानस्य पटकारणत्वाभाववत् कृत्यनन्तरभाविस्पर्शनचन्दनादिज्ञानस्य सुखहेतुत्वं न सिध्येदित्यर्थः । किञ्च तव मते कृतिविषयज्ञाने व्यभिचारः, तदतिरिक्तत्वे सतीत्युक्तेऽप्रयोजक इत्याह—व्यभिचारादिति । अङ्गीकारं परित्यजति—कृतिपूर्वेति । वक्ष्यत इति । ईश्वरवादे इत्यर्थः । सुखस्येष्टज्ञानकार्यत्वानिश्चयादेव सुखेन तदनुमाने तदनुसन्धानमिति प्रत्युक्तमित्याह—एतेनेति ॥

प्राभाकरस्य पूर्वपक्षः

नन्वस्तु तर्ह्यहङ्कारसमवेतं ज्ञानं स्वप्रकाशं धारानुसन्धानादिकस्य सर्वस्योपपत्तय इति चेन्न। जानामीति तस्य ज्ञानविषयत्वानुभवात्। घटादेरपि विषयत्वेऽनुभवस्यैव मानत्वात्। न चेदं ज्ञानं भ्रमः। बाधकाभावात्। चक्षुरादिजन्यज्ञानं, न स्वप्रकाशं, कार्यत्वात्, रूपवत्, विपक्षे च जानामीत्यनुभवायोगो बाधकः।

स्वविषयत्वं स्वप्रकाशत्वमिति स्वीकर्तुर्मतानुवादः

अत्र नवीनः। ननु ज्ञानस्य विषयत्वानुभवो धीस्वप्रकाशत्वेन न विरुध्यते। स्वविषयत्वस्यैव स्वप्रकाशत्वेऽविरोधात्। अन्यथा स्वव्यवहारहेतुत्वसंशयविरोधितादेरयोगात्। न च ज्ञानस्य स्वस्मादन्यत्र व्यवहारजनने स्वविषयत्वं तन्त्रं, स्वस्मिंस्तु स्वाभेद एवेति युक्तम्। पक्षादन्यत्रैवायं नियम इत्यस्य सर्वत्र सुवचत्वात्। दुःखादिविषयस्य द्वेषस्य स्वाभेदे तस्यापि स्वविषयत्वव्यतिरेकेण दुःखादाविव स्वस्मिन्निवृत्तिहेतुत्वस्य स्वेच्छाविरोधित्वस्य चादर्शनात्। स्मरणरूपस्य परोक्षा-

---

अहमर्थसमवेतज्ञानस्य ज्ञातृज्ञानज्ञेयप्रकाशात्मकत्वाद्धाराद्यनुसन्धानोपपत्तिरिति प्राभाकरः प्रत्यवतिष्ठते—नन्वस्त्विति।

अवेद्यस्य स्वप्रकाशत्वादस्य च वेद्यत्वान्न स्वप्रकाशत्वं, नापि त्रिपुटीप्रकाशत्वं चेत्यभिप्रेत्य दूषयति—न जानामीति। जानामीति ज्ञाने हि ज्ञानमाकारः, आकारश्च विषय एवेत्यर्थः। जन्यज्ञानस्यास्वप्रकाशत्वेऽनुमानमपि मानमित्याह—चक्षुरादीति। ननु नावेद्यत्वं स्वप्रकाशत्वं, किन्तु स्वविषयत्वं तथा च जन्यज्ञानं स्वविषयत्वात्स्वप्रकाशमिति नवीनमतमनुवदति—अत्रेति। ज्ञानस्य स्वविषय एव संशयादिविरोधित्वं व्यवहारहेतुत्वं च घटादिविषये दृष्टं स्वस्यापि विषयत्वाभावे स्वस्मिंस्तदुभयं न स्यादित्याह—अन्यथेति। ज्ञानादन्यत्रैव व्यवहारः स्वसमानविषयज्ञानजन्यः, ज्ञाने तु नैवमित्याशङ्कयानुमानमात्रोच्छेदापातान्नैवमित्याह—न च ज्ञानस्येति। किं च द्वेषस्य स्वाभेदे सत्यपि स्वविषयत्वा-

नुभवस्य च वृत्तिज्ञानस्य स्वाभेदे सत्यपि स्वविषयत्वव्यतिरेकेण स्वविषय इव स्वस्मिन्नपि व्यवहारादिहेतुताया अदर्शनाच्च। वृत्तेरपि स्वव्यवहारहेतुत्वे स्वप्रकाशत्वापत्तेः ॥

एकस्य विषयविषयिभावो विरुद्धः

ननु स्वस्य स्ववेद्यत्वं विरुद्धमिति चेन्न, तत्किमिति विरुद्धं ? किं साक्षात्कारस्य विषयजन्यत्वात् स्वस्य च स्वजन्यत्वायोगात्, किं वा साक्षात्कारे स्वजनकेन्द्रियसन्निकृष्टस्यैव स्वविषयत्वात् स्वजनकेन्द्रियसन्निकर्षकाले स्वस्याभावात्। यद्वा विषयविषयिभावस्योभयनिष्ठत्वादेकस्मिंस्तदयोगात्। नाद्यद्वितीयौ, स्वप्रकाशस्यात्मस्वरूपज्ञानस्य तयोरभावात्। न तृतीयः, अतीतारोपितात्यन्तासतां ज्ञानदर्शनेन तस्योभयानिष्ठत्वात्। ननु ज्ञानस्यैव ज्ञेयत्वे क्रियाकर्मत्वादिविरोध इति चेन्न। कृतिविशेषस्य क्रियात्ववदुपपत्तेः।

---

भावादेव स्वस्मिन् स्वप्रयुक्तकार्याभावो दृष्टः, एवं ज्ञानेऽपि स्यादित्याह—दुःखादीति। किं च तव मते ऽपरोक्षस्थले स्फुरणस्य व्यवहारजनकत्वेऽपि परोक्षस्थले वृत्तेरेव व्यवहारहेतुत्वं स्वविषय एवाङ्गीकृतं न तु स्वस्मिन्। तत्कस्य हेतोः स्वविषयत्वाभावादेव, एवमन्यत्रापि स्यादित्याह—स्मरणेति। परोक्षवृत्तेः स्वविषयव्यवहारहेतुत्वे को दोषस्तत्राह—वृत्तेरपीति। तथा च साक्षिरूपानुभवो न सिध्यतीति भावः ॥

एकस्य विषयविषयिभावो विरुद्ध इति चोदयति—नन्विति।

विरोधप्रयोजकं विकल्पयति—तत्किमिति। साक्षिप्रत्यक्षविषयाहङ्कारादेस्तज्जनकत्वतज्जनकेन्द्रियसन्निकृष्टत्वयोरभावेऽपि तद्विषयत्वाङ्गीकारान्नेमौ नियमाविति दूषयति—नाद्यद्वितीयाविति। जन्यप्रत्यक्षविषयस्यायं नियम इति चेत्तर्हि स्वव्यतिरिक्तप्रत्यक्षविषयस्यैवायं नियमोऽस्त्विति भावः। तृतीये अतीतादिज्ञानानां निर्विषयत्वप्रसङ्ग इत्याह—न तृतीय इति। ज्ञानं स्वकर्मकं न भवति क्रियात्वात् गमनादिवद्विति चोदयति—नन्विति। परिस्पन्दलक्षणक्रियात्वं ज्ञाने ऽसिद्धं, धात्वर्थलक्षणक्रियात्वमनित्यकृतौ व्यभिचारीति दूषयति—न कृतीति। ननु कर्मलक्षणपर्यालोचनायां नैकस्य क्रियाकर्मत्वमुपपद्यते अनित्यकृतेस्तु नित्यकृतिं प्रति कर्मत्वान्न व्यभिचार इति चोदयति—ननु परेति। अतीतादावुक्तलक्षणा-

**ननु परसमवेतक्रियाफलशालित्वं कर्मत्वं, तत्कथमेकस्मिन्नेव क्रियात्वं कर्मत्वं च, कृतिस्तु कृत्यन्तरस्यैव कर्मेति चेन्न। क्रियाविषयत्वस्यैव कर्मत्वात्। ननु कर्त्तुः कर्मत्वं विरुद्धमिति चेन्न। ज्ञानस्यातत्कर्तृत्वात्। विषयिणो विषयत्वं विरुद्धमिति चेन्न। अज्ञानसाक्षिणो ब्रह्मणोऽज्ञानविषयत्वात्। "तदात्मानमेवावेत्" इति श्रुतेश्च ॥**

स्वप्रकाशत्वोपसंहारः

**ज्ञानस्य स्वविषयत्वाभावे सर्वोपसंहारेण व्याप्तेर्मिथ्यात्वानुमितेश्च स्वविषयत्वं न सिध्येत्। तस्माच्चैत्रसमवेतमयं घट इति ज्ञानं चैत्रापरोक्षानुभवविषयः, चैत्रस्यापरोक्षव्यवहारविषयत्वात्, घटवदित्यनुमानात् जानामीत्यनुभवाच्च परिशेषाज्ज्ञानं स्वविषय इति ॥**

---

सम्भवादन्यदेव कर्मलक्षणमित्याह—न क्रियेति। कर्तुगुणत्वात्कर्मणः प्राधान्यादेकस्य तदुभयरूपत्वं विरुद्धमिति शङ्कते—ननु कर्त्तुरिति। ज्ञानस्य स्वाश्रयत्वानङ्गीकारान्न कर्तृत्वमित्याह—न ज्ञानस्येति। विषयित्वे विषयत्वं न स्यादिति शङ्कते—विषयिण इति। एकमज्ञानं प्रत्येकस्यैव ब्रह्मणो विषयत्वं विषयित्वं च दृष्टमिति परिहरति—न अज्ञानेति। ननु विषयोऽस्यास्तीति विषयीत्युच्यते, एकस्य तु स्वेन सम्बन्धाभावेन षष्ठ्यर्थाभावान्न स्वविषयत्वमिति चेन्न। अभेदसम्बन्धसम्भवादिति भावः। श्रुतिरेव ब्रह्मणः स्वविषयत्वं दर्शयतीत्याह—तदात्मानमिति। तद्ब्रह्म आत्मानमवेत्, ज्ञातवदित्यर्थः ॥

यत्कार्यं तत्सकारणकमित्यादिव्याप्तिग्रहे स्वस्यापि कार्यत्वाद्विषयत्वं वक्तव्यं, प्रपञ्चो मिथ्येत्यनुमाने स्वस्यापि पक्षत्वेन विषयत्वं वक्तव्यमन्यथा दोषमाह—ज्ञानस्येति।

तर्कितेऽर्थे प्रयोगमाह—तस्मादिति। चैत्रपरोक्षज्ञानस्य पक्षत्वे बाधः स्यात्तन्निवृत्त्यर्थमयं घट इति विशेषणम्। मैत्रज्ञानव्यवच्छेदार्थं चैत्रसमवेतमिति। ईश्वरज्ञानविषयत्वेनार्थान्तरतानिवृत्तये साध्ये चैत्रपदम्। चैत्रपरोक्षज्ञानविषयत्वेन सिद्धसाधनतानिवृत्तये अपरोक्षपदम्। मैत्रसुखे चैत्रव्यवहारपदे व्यभिचारपरिहारार्थं हेतौ चैत्रपदमपरोक्षपदं च। ननु चैत्रानुव्यवसायविषयत्वेनार्थान्तरतेत्याशङ्क्य तस्य निरस्तत्वादनवस्थापत्तेश्च स्वविषयत्वसिद्धिरित्याह—परिशेषादिति ॥

नवीनमतं दूषयितुमुपक्रमते—अत्रेति।

स्वविषयत्वरूपस्वप्रकाशत्वखण्डनम्

**अत्रोच्यते। घट इति जन्यप्रत्यक्षं नैतज्ज्ञानविषयः, एतज्जनकसन्निकर्षानाश्रयत्वात्, सम्मतवत्, वैशिष्ट्यमसन्निकृष्टमपि भासत इति मते घटव्यक्तिजन्यप्रत्यक्षं नैतद्विषयः तत एव तद्वत् ॥**

असन्निकृष्टस्य न विषयत्वम्

**न चाप्रयोजकः। वैशिष्ट्यातिरिक्तस्य जन्यप्रत्यक्षविषयत्वे तज्जनकसन्निकर्षाश्रयत्वस्यैव प्रयोजकत्वात्। अन्यथाऽतिप्रसङ्गात्। घटजन्यं ज्ञानं नैतद्विषयः एतदजनकत्वादिति वा। पक्षादन्यत्रैवायं नियम इति सर्वत्र वक्तुं शक्यत्वादित्युक्त्वा ज्ञानान्यविषयत्वे ज्ञानस्य तत्सन्निकर्षजन्यत्वं प्रयोजकं ज्ञाने तु**

---

तत्र तावदनुमानस्य प्रतिप्रयोगपराहतिमाह—घट इति। घटविषयशाब्दज्ञानस्यापि पक्षत्वे तज्जनकसन्निकर्षाप्रसिद्ध्या तत्र हेतोरसिद्धिः स्यात्तन्निवृत्त्यै प्रत्यक्षपदम्। ईश्वरज्ञाने ऽप्युक्तदोषपरिहाराय जन्यपदम्। जन्यप्रत्यक्षमित्युक्ते प्रमेयमिति ज्ञानस्यापि पक्षता स्यात्तथा च तत्र परमते हेतोरसिद्धिः, तज्जनकसन्निकर्षरूपप्रमेयत्वाश्रयत्वात्तन्निवृत्त्यै घट इतीति। नैतज्ज्ञानविषय इति। पक्षीभूतज्ञानविषयो नेत्यर्थः। न च घटादिविषयाद्भेद इष्ट इति वाच्यम्। एतज्ज्ञानाविषयत्वस्य साध्यत्वात्सविषयकत्वस्याप्यसम्भवात्। पक्षीभूतज्ञानस्यापि वैशेषिकादिमते ऽनुव्यवसायजनकसन्निकर्षाश्रयत्वादित्यसिद्धिवारणाय हेतावेतत्पदम्। अस्मन्मते च पटादिदृष्टान्तसाधनवैकल्यपरिहारार्थमिति द्रष्टव्यम्। ननु घटे घटत्ववैशिष्ट्यस्यासन्निकृष्टस्यैव विषयत्वात्तत्र व्यभिचार इति चेन्न। तस्यापि सन्निकृष्टत्वात्। अन्यथा तत्र तस्य विषयत्वायोगात्। अङ्गीकृत्यापि व्यक्त्यंशज्ञानस्यैव पक्षत्वान्न दोष इत्याह—वैशिष्ट्यमिति ॥

यदुक्तमसन्निकृष्टस्यापि विषयत्वं साक्षिविषयवदुपपद्यत इति तत्राह—न चाप्रयोजक इति।

प्रयोगान्तरमाह—घटजन्यमिति। ननु ज्ञानातिरिक्तस्य जन्यप्रत्यक्षविषयत्वे तज्जनकसन्निकर्षाश्रयत्वं प्रयोजकं ज्ञानस्य तु स्वाभेद एवेत्युक्तमित्याशङ्क्य तदुक्तदोषं तस्मिन् पातयति—पक्षादन्यत्रेति। तर्हि जानामीति तस्य ज्ञानविषयत्वानुभव-

तदभेद एवेति वदितुं कथं न लज्जसे । न चानुभवविरोधः । अनुभवो ह्यहङ्कारधर्मज्ञानस्य विषयत्वे साक्षी न तु स्वविषयत्वे । विषयत्वं च ज्ञानान्तरवेद्यत्वेऽपि सम्भवति । तच्च ज्ञानमनुव्यवसायो नेत्युक्तमित्यनुभवानुमानाभ्यामेवाहङ्कारधर्मातिरिक्तं ज्ञानं तत्साक्षी सिध्यति ।

अतएव त्वदुक्तानुमानमपि सिद्धसाधनम् । न च चैत्रजन्यानुभवविषय इति साध्यम् । अप्रयोजकत्वात् । व्यवहारस्यानुभवविषयत्वमात्रेणोपपत्तेः । अत एव परोक्षवृत्तिमिथ्यात्वानुमित्यादेश्च न स्वविषयत्वं, न वा तदसिद्धिः । तदभिव्यक्तसाक्षिण एव तत्सिद्धेः । नन्वलौकिकज्ञानाभ्युपगमे गौरवमिति चेन्न । त्वदभ्युपगतपरमात्मचैतन्यस्यैवास्माभिरहङ्कारतद्वृत्तिसाक्षिजीवस्वरूपतयाऽभ्युपगमात् ॥

स्वेनैव साक्षिव्यवहारे विकल्पयोजनम्

ननु तदपि ज्ञानं स्वविषयं न वा ? न चेत् तद्विषयव्यवहारो न स्यात् । प्रथमे तत्सन्निकर्षानाश्रयस्य तद्विषयत्वविरोध

---

विरोध इत्यत आह—न चेति । जन्यज्ञानस्य वेद्यत्वमात्रमनुभूयते न तु स्ववेद्यत्वम् । वेद्यत्वं च साक्षिविषयत्वेऽप्युपपद्यत इत्याह—अनुभवो हीति । साक्षिप्रमाणमिति यावत् । अनुव्यवसायातिरिक्तं जन्यज्ञानविषयजीवप्रत्यक्षं तद्भिन्नमस्मदभिमतसाक्षिज्ञानमेवेत्युपसंहरति—इत्यनुभवेति । यदुक्तं चैत्रसमवेतं ज्ञानं चैत्रापरोक्षानुभवविषय इति तत्र किं साध्यं यथाश्रुतमेवोत चैत्रजन्यमिति विवक्षितम् । आद्ये चैत्रस्वरूपसाक्षिविषयत्वमिष्टमित्याह—अत एवेति । द्वितीये हेतुरप्रयोजक इत्याह—न च चैत्रेति । यच्चोक्तं व्याप्तिज्ञानमिथ्यात्वानुमित्यादेः स्वविषयत्वं वक्तव्यमिति तदपि साक्षिविषयत्वाभ्युपगमादेव निरस्तमित्याह—अत एवेति । ननु स्वविषयत्वनिराकरणेन नित्यज्ञानविषयत्वसाधने ऽलौकिकज्ञानकल्पनागौरवमित्याशङ्क्योभयवादिसिद्धनित्यज्ञानस्य जीवस्वरूपत्वमात्रसाधनान्नैवमित्याह—नन्वित्यादिना ॥

ननु साक्षिव्यवहारः स्वेनैव भवति, उतान्येन । द्वितीयेऽनवस्थेत्यभिप्रेत्याद्यमपि विकल्प्य दूषयति—ननु तदपीति ।

इति चेन्न । तदनाश्रयस्यापि तद्विषयत्वे तवेश्वरज्ञानवदविरोधात् । किं च व्यवहारमात्रे व्यवहर्तव्यज्ञानं प्रकाशत्वेन हेतुर्न तु व्यवहर्तव्यविषयप्रकाशत्वेन । गौरवेण तस्य तेन रूपेणाप्रयोजकत्वात् । ज्ञानव्यवहारविशेषे च ज्ञानमेव व्यवहर्तव्यं प्रकाशश्चेति किं तद्विषयत्वेन ।

ननु ज्ञानं स्वविषयत्वाभावे स्वस्य प्रकाश एव न भवतीति चेत् । किं षष्ठ्यर्थसम्बन्धार्थं विषयत्वमपेक्षणीयं किं वा तस्य प्रकाशत्वार्थम् ? नाद्यः । भेदाभावेनाभेदस्वरूपातिरिक्तसम्बन्धस्यानपेक्षितत्वात् । कथञ्चिदभेदस्यैव षष्ठ्यर्थत्वात् । न द्वितीयः । न हि ज्ञानस्य विषयत्वप्रयुक्तं प्रकाशत्वं किं तु ज्ञानस्वरूपविशेषप्रयुक्तम् । अन्यथेच्छादेरप्यर्थप्रकाशत्वापत्तेः । तस्याप्यर्थविषयत्वात् । न च स्वविषयत्वमेव प्रकाशत्वं तत्रेच्छादेरिति वाच्यम् । सर्वजिज्ञासायाः स्वविषयत्वात् ॥

---

तत्सन्निकर्षेति । तज्जनकसन्निकर्षानाश्रयस्येत्यर्थः । साक्षिणः स्वविषयत्वमङ्गीकृत्य जन्यप्रत्यक्षज्ञानविषयस्यैव जनकसन्निकर्षाश्रयत्वनियम इत्यभिप्रेत्याह—न तदनाश्रयस्येति । अङ्गीकारपरित्यागेन सिद्धान्तमाह—किञ्चेति । यथा आलोकस्य स्वाविरुद्धविषयचाक्षुषज्ञानमात्रे आलोकत्वेन कारणत्वं स्वव्यतिरिक्तस्वाविरुद्धविषयकचाक्षुषज्ञाने विषयसम्बन्ध्यालोकत्वेन स्वविषयज्ञाने तु स्वाभेदेनैव कारणत्वमेवं व्यवहर्तव्यज्ञानं व्यवहारमात्रे प्रकाशत्वेन कारणं स्वव्यतिरिक्तविषयकव्यवहारे तद्विषयकप्रकाशत्वेन स्वव्यवहारे तु स्वाभिन्नप्रकाशत्वेनेति स्वस्मिन्नपि सामान्यक्लृप्तकारणस्य सत्त्वान्न पक्षादन्यत्रैवायं नियम इत्युपालम्भस्यावसर इत्यभिप्रेत्याह—व्यवहारमात्र इति । ज्ञानस्य स्वविषयत्वाभावे व्यवहर्तव्यप्रकाश इति सामान्यप्रयोजकमपि न सम्भवतीति शङ्कते—ननु ज्ञानमिति । विषयत्वस्योपयोगो नास्तीत्यभिप्रायेण विकल्पयति—किं षष्ठ्यर्थेति । सम्बन्धस्य भेदसमानाधिकरणत्वाद्विषयत्वाभ्युपगमे ऽप्यनुपपत्तिस्तुल्येत्यभिप्रेत्याह—नाद्य इति । कथं तर्हि षष्ठीप्रयोग इत्याशङ्क्य त्वयाप्युपचाराद्वक्तव्य इत्यभिप्रेत्याह—कथंचिदिति । द्वितीये विषयत्वमात्रं किं प्रकाशत्वे प्रयोजकं उत स्वविषयत्वं अथवा ज्ञानत्वे सति स्वविषयत्वं ? नाद्यः व्यभिचारादित्याह-नहीति । अज्ञानादिविरोधित्वं ज्ञाने स्वरूपविशेषः । द्वितीयमपि व्यभिचारेण दूषयति—न च स्वविषयत्वमिति ॥

न च ज्ञानत्वे सति स्वविषयत्वं प्रकाशत्वमिति वाच्यम्। लाघवेन ज्ञानस्वरूपविशेषस्यैव प्रकाशत्वप्रयोजकत्वात्। तथा च स्फुरणमनुभवगोचरः व्यवहारविषयत्वादिति स्फुरणस्य स्वगोचरत्वसाधकमनुमानमप्रयोजकम्।

ज्ञानस्य स्वविषयसंशयादिविरोधित्वम्

एतेन ज्ञानस्य स्वविषयसंशयविरोधित्वादयोऽपि व्याख्याताः। घटाद्याकारजन्यज्ञानस्य स्फुरणवेद्यत्वेन संशयविरोधित्वाद्युपपत्तेः स्वरूपज्ञानस्य वृत्तिमहिम्नैव तदुपपत्तेरिति। द्वेषस्तु स्वविषय एव निवृत्तिहेतुस्तथैवान्वयव्यतिरेकदर्शनात्। ज्ञानं तु प्रकाशत्वेन तदभेदेन च ज्ञानव्यवहारहेतुः। विषयत्वं विनापि स्वस्य प्रकाश इत्युक्तम्॥

---

तृतीये विशेषणस्यैव प्रयोजकत्वे सति न विशिष्टस्य प्रयोजकत्वं गौरवादित्याह—न च ज्ञानत्वे सतीति।

जडव्यावृत्ताज्ज्ञानस्वरूपविशेषस्येत्यर्थः। व्यवहारसामान्यकारणादेव स्फुरणव्यवहारोपपत्तिसाधनफलमाह—तथा चेति। यदप्युक्तं ज्ञानस्य स्वविषयत्वाभावे स्वविषयसंशयादिविरोधित्वं न स्यादिति, तदपि वक्ष्यमाणप्रकारेण निरस्तमित्याह—एतेनेति। तत्र किं वृत्तिज्ञानस्य संशयादिविरोधित्वानुपपत्तिरुतात्मरूपज्ञानस्य? नाद्य इत्याह—घटाद्याकारेति। द्वितीये घटाद्याकारवृत्तिमदन्तःकरणाभिव्यक्तरूपविशेषादेव सत्ताप्रकारकसंशयादिविरोधित्वमित्यभिप्रेत्याह—स्वरूपज्ञानस्येति। द्वेषे द्वेषकार्यादर्शनात्तद्विषय एव तत्कार्यमिति वैषम्यमाह—द्वेषस्त्विति। ननु ज्ञानव्यवहारस्य कार्यविशेषत्वात्सामान्यकारणातिरिक्तविशेषकारणजन्यत्वं वाच्यम्, अन्यथा कार्यविशेषस्याकस्मिकत्वप्रसङ्गादित्याशङ्क्य नायमस्ति नियमः सर्वैः स्वतस्त्ववादिभिरसति दोषे ज्ञानसामान्यसामग्रीत एव प्रमारूपकार्यविशेषाङ्गीकारात्। सर्वैरपि वादिभिरसत्यां स्मृतिसामग्र्यां ज्ञानसामान्यसामग्रीत एवानुभवरूपकार्यविशेषाङ्गीकारादित्यभिप्रेत्याह—ज्ञानं त्विति। विशेषकारणेन भवितव्यमित्यभिनिविशमानं प्रति तदप्यस्तीत्याह—तदभेदेन चेति। यद्यप्यस्मन्मते शास्त्रगम्योऽभेदः प्रकाशस्वरूप एव तथाप्यविद्यादशायां भेदप्रतियोगिकाभेदस्य धर्मरूपस्याङ्गीकाराद्विशेषकारणसिद्धिरिति भावः। सामान्यकारणमुक्तं स्मारयति—विषयत्वमिति।

स्वविषयत्वस्य निर्वक्तुमशक्यत्वाच्च तदनुमानमयुक्तमित्याह—किञ्चेति।

स्वविषयत्वं निर्वचनानर्हम्

किञ्च किमिदं ज्ञानस्य स्वविषयत्वम्। स्वजन्यव्यवहारविषयत्वमिति चेन्न। ज्ञानातिरिक्ते ज्ञानविषय एव ज्ञानं व्यवहारं जनयतीति व्यवहारहेतुत्वप्रयोजकज्ञानविषयत्वस्य तदभेदानुपपत्तेः। नापि तद्योग्यता। तस्या अपि घटादौ ज्ञानविषयत्वयोग्यतानिर्वाह्यत्वात्। अत एव न ज्ञानजन्यज्ञातताश्रयत्वादिकं घटादौ यद्विषयत्वं तदेवेति चेत्, न, स्वरूपसम्बन्धविशेषो हि घटादेर्विषयत्वं स च भेदनिष्ठ एव ॥

अभेदस्य न सम्बन्धत्वम्

अभेदश्च न सम्बन्धः। रूपी घट इतिवद्रूपं रूपीत्यननुभवात्। सर्वजिज्ञासादेरपि विषयिविषयत्वप्रयोजकधर्मभेदेन तेन रूपेण कल्पितभेदसत्त्वात्। अथवा सर्वजिज्ञासादेर्न स्वविषयत्वं तस्य विशिष्यज्ञातत्वात्। न च ज्ञातेऽपि रूपान्तरेण जिज्ञासा।

---

किं स्वजन्यव्यवहारविषयत्वं स्वविषयत्वमुत तद्योग्यत्वमाहो स्वजन्यज्ञातताधारत्वमथवा घटादौ यत्स्वविषयत्वं तदेवेति किं शब्दार्थः। आद्यमनुवदति—स्वजन्येति। अस्माभिरपि स्वजन्यव्यवहारविषयत्वाङ्गीकारात्सिद्धसाधनं स्फुटमिति मत्वा परमत इदमयुक्तं चेत्याह—न ज्ञानेति। ज्ञानविषयत्वस्य व्यवहारविषयत्वप्रयोजकतायास्त्वयैवोक्तत्वात्तदेव तदित्यनुपपन्नमित्यर्थः। द्वितीयेऽपि तद्योग्यतावच्छेदकत्वेन ज्ञानविषयत्वयोग्यता पृथग्वक्तव्येत्यभिप्रेत्याह—नापीति। ज्ञातताधारत्वस्यापि ज्ञानविषयत्वप्रयोज्यत्वान्न तृतीयोऽपीत्याह—अत एवेति। चतुर्थं शङ्कते—घटादाविति। ज्ञानभिन्नस्वरूपविशेषस्यैव तत्र विषयरूपत्वात्स्वस्मिंस्तदसम्भव इति दूषयति—न स्वरूपेति ॥

अभेदोऽपि स्वरूपसम्बन्धो भवत्वित्याशङ्क्याह—अभेदश्चेति।

अभेदस्य सम्बन्धत्वे रूपे रूपवैशिष्ट्यप्रत्ययः स्यात्। न च रुपे रूपं नास्तीति वाच्यम्। मत्वर्थप्रत्यये सम्बन्धमात्रस्यापेक्ष्यत्वात्। अन्यथा गोमानित्यादिप्रत्ययो न स्यादित्यर्थः। यदुक्तं सर्वजिज्ञासादेः स्वविषयत्वं दृष्टमिति तदङ्गीकृत्य सर्वत्वेच्छात्वरूपभेदेन तदुपपत्तिमाह—सर्वजिज्ञासेति। अङ्गीकारं परित्यजति—अथवेति। इच्छात्वेन ज्ञातेऽपि गुणत्वादिरूपेण जिज्ञासेत्याशङ्क्य

सर्वत्वप्रकारकतज्ज्ञानस्येदानीमपि सत्त्वात् । सुखाहेतोस्तस्येच्छायोगाच्च । विनष्टाया इच्छायाः कालान्तरे प्रत्यक्षत्वायोगात्तदिच्छाया अप्यनुपपत्तेः ।

प्रमेयत्वाद्याकारा वृत्तिरपि न स्वविषया । तत्र प्रमाणाभावात् । प्रत्यासत्त्याश्रयस्य सर्वस्य विषयत्वानियमात् । तदवच्छिन्नसाक्षिण एव तत्प्रकाशनसम्भवात् । प्रमेयत्वादिकमपि न स्ववृत्तीति न तदर्थमप्यभेदः सम्बन्धः । प्रकाशविषयत्वे प्रकाशस्य जडत्वापत्तेश्च । अतो नात्मनः स्वविषयत्वम् ॥

प्रत्यासत्त्याश्रयत्वस्य न नित्यज्ञानविषयत्वम्

एतेन जन्यज्ञानस्यातिप्रसङ्गपरिहारार्थमस्तु स्वजनकेन्द्रियसन्निकृष्टविषयत्वमित्यस्वविषयत्वं स्वरूपज्ञानस्य तु

---

तदपि सामान्येन ज्ञातमेवेत्याह—न च ज्ञातेऽपीति । विशिष्य तज्ज्ञानमिष्यत इत्याशङ्क्य काकदन्तपरीक्षावत् अप्रयोजकत्वान्मैवमित्याह-सुखेति । ननु सर्वगोचरप्रत्यक्षस्य सुखहेतुत्वेनाङ्गीकारात् इच्छापि विशिष्य जिज्ञास्यत इत्याशङ्क्य तत्काले नष्टाया इच्छायाः सम्विदभिन्नत्वाभावेन प्रत्यक्षत्वमेवायुक्तमित्याह—विनष्टाया इति । ननु ज्ञानजनकप्रत्त्यासत्त्याश्रयस्य ज्ञानविषयत्वनियमात् प्रमेयमिति ज्ञानस्यापि प्रमेयत्वाश्रयत्वात् स्वविषयत्वमावश्यकमित्याशङ्क्य यो विषयः स प्रत्त्यासत्त्याश्रय इत्येव नियमो न तु यः प्रत्त्यासत्याश्रयः स विषय इति चक्षुरादौ व्यभिचारादित्यभिप्रेत्याह—प्रत्त्यासत्तीति । कथं तर्हि तज्ज्ञानव्यवहारादित्यत आह—तदवच्छिन्नेति । यथा प्रमेयत्वस्याभेदसम्बन्धेन स्ववृत्तित्वमेवं ज्ञानस्याप्यभेदसम्बन्धेन स्वविषयत्वमित्याशङ्क्य दृष्टान्त एवासम्प्रतिपन्न इत्याह—प्रमेयत्वादीति । किञ्च ज्ञानस्य प्रकाशविषयत्वेऽप्रकाशत्वमेव स्यात् स्वप्रकाशत्वं तु दूरापास्तमित्यभिप्रेत्याह—प्रकाशविषय इति । अत इत्युपसंहारः ॥

प्रत्त्यासत्त्याश्रयत्वनियमस्यानित्यज्ञानविषयत्वान्नित्यज्ञानस्य स्वविषयत्वे न दोष इत्याशङ्क्याह—एतेनेति ।

एतेनेत्येतद्विवृणोति—स्वविषयत्वेति । आत्मनो विषयत्वं श्रुतिबाधितं चेत्याह—विज्ञातारमिति । येनेदं सर्वं विजानाति तं केन विजानीयादिति पूर्ववाक्ये स्वव्यतिरिक्तप्रकाशाविषयत्वमुक्त्वा विज्ञातारमिति वाक्येन स्वविषयत्वं निषिध्यते,

चैतन्याविरोधितया ज्ञानस्य चोद्यान्तरपरिहारः

**एतेन चैतन्याज्ञानयोरविरोधित्वे कथन्तयोः प्रकाशत्वाप्रकाशत्वे ज्ञानत्वाज्ञानत्वे च स्यातामिति निरस्तम् । वृत्तिसहकृतचैतन्यस्याज्ञानविरोधित्वाभ्युपगमात् । अत एवेदमपि परास्तम्, अनुमेयादिगोचरपरोक्षवृत्तौ सत्यामपि नानुमेयादौ भावरूपाज्ञाननिवृत्तिः, इच्छादौ च वृत्तिमन्तरेणापि स्फुरणमात्रेणाज्ञाननिवृत्तिरित्यन्वयव्यतिरेकव्यभिचाराद्वृत्तिर्नाज्ञाननिवृत्तौ हेतुरिति । अपरोक्षवृत्तेरेवाज्ञाननिवृत्तिहेतुतया परोक्षवृत्तेरन्वयव्यभिचारस्यादूषणत्वात् । नह्यानुमानिकाद्विशेषदर्शनादपरोक्षभ्रमो न निवर्तत इति नापरोक्षमपि विशेषदर्शनं तत्र हेतुः । इच्छादेश्चानावृतसाक्ष्यध्यासादेवाज्ञानविरहात्स्फुरणमात्रादज्ञाननिवृत्तौ नोदाहरणम् ।**

**यच्चोक्तं वृत्तिर्यद्यर्थप्रकाशत्वरूपं विहाय जातिविशेषेणाविद्यातत्कार्ये निवर्तयेत्तदा रागनिवर्त्यद्वेषवत्तयोः सत्यत्वेऽपि**

---

विरोधित्वमविद्यायाः प्रतीयत इत्याह—वृत्तिशबलमिति । तत्रहेतुमाह—नञर्थस्येति । न जानामीत्यत्र नञर्थस्याज्ञानधर्मिकविरोधित्वस्य सम्बन्धिज्ञानपदस्य योऽर्थो वाच्यो वृत्तिकवलीकृतचैतन्यं तन्निरूप्यत्वनियमादित्यर्थः ॥

वृत्त्यविरोधित्वेऽपि चैतन्यविरोधित्वानपायादन्यदपि चोद्यं निरस्तमित्याह—एतेनेति ।

अत एवेदमिति । स्पष्टोऽर्थः । अपरोक्षप्रमाणवृत्तेरेव निवर्तकत्वाभिधानान्नात्र नान्वयव्यभिचार इत्याह—अपरोक्षेति । परोक्षवृत्तेरविद्यानिवृत्तौ व्यभिचारेऽपि नापरोक्षवृत्तेर्व्यभिचार इत्यत्रोदाहरणमाह—न हीति । पीतः शङ्ख इति भ्रमस्यानुमानिकश्वैत्यज्ञानेनानिवृत्तावपि तदपरोक्षज्ञानस्य तन्निवृत्तौ हेतुत्वदर्शनादित्यर्थः । व्यतिरेकव्यभिचारश्च नास्तीत्याह—इच्छादेरिति । वृत्त्यभावेऽपि यद्यज्ञाननिवृत्तिः स्यात्तर्हि व्यतिरेकव्यभिचारः स्यान्नैतदस्ति इच्छाद्यवच्छिन्नचैतन्यावरकाविद्याभावेन तन्निवृत्तिरपि नेत्यर्थः । वृत्तेः किं जातिविशेषप्रयुक्तमविद्यानिवर्तकत्वमुतार्थप्रकाशत्वप्रयुक्तम्? आद्ये तन्निवर्त्यस्य रागनिवर्त्यद्वेषवन्मिथ्यात्वं न सिद्ध्येत् ।

